# शक्ति – सूत्राणि

| कमांक | सूत्राणि | कमांक | सूत्राणि |
|---|---|---|---|
| 1 | अथातः शक्तिसूत्राणि। | 33 | लीयते तत्रैकदेशप्रवादः। |
| 2 | यत्कर्वी। | 34 | यस्मातारतम्याभ्यां जन्तूनां। |
| 3 | यदजा। | 35 | सौम्यं जननमरणयोः। |
| 4 | नान्तरयोऽत्र। | 36 | पौनःपुन्यात्। |
| 5 | तत्सानिध्यात्। | 37 | यदेव संसारः। |
| 6 | तत्कल्पकत्वमौपाधिकम्। | 38 | ऊर्णनाभिः। |
| 7 | समानधर्मत्वात्। | 39 | सादृश्यानन्त्यं |
| 8 | तच्च प्रातिभासिकम्। | 40 | तत्सिद्धिरेव सिद्धिः। |
| 9 | यद्बन्धः। | 41 | तद्वत्त्वात्। |
| 10 | यदारोपाध्यासादैक्यम्। | 42 | यच्चैतन्यभेदे प्रमाणम्। |
| 11 | शब्दाधिष्ठानलिंगम् | 43 | तद्बुद्धेः। |
| 12 | नानावान्। | 44 | नन्नाशे तन्नाशः। |
| 13 | तच्च कालिकम्। | 45 | भूतभैतिकौ। |
| 14 | अखण्डोपाधेः। | 46 | अन्यथाज्ञेयत्वं भावात्। |
| 15 | यामेव भूतानि विशन्ति। | 47 | तन्निर्लेपः पुष्करपर्णवत्तत्वं। |
| 16 | यदोतं यत्प्रोतं | 48 | सतः। |
| 17 | तद्विष्णुत्वात्। | 49 | पुष्पगन्धवत्। |
| 18 | ततो जगन्ति कियन्ति | 50 | मुक्तः सर्वो बद्धः सर्वः। |
| 19 | नानात्वेऽप्येकत्वमविरुद्धम्। | 51 | यद्विलासात्। |
| 20 | विचारात्। | 52 | तत् स्रष्टृत्वानुमितेः। |
| 21 | यस्माददृश्यं दृश्यंच। | 53 | अंगान्तरं व्यभिचरितम्। |
| 22 | दृष्टित्वव्यपदेशाद्वा। | 54 | नो दोषः। |
| 23 | अविनाभावित्वात्। | 55 | यद्देयं तत्पुराणः। |
| 24 | भिन्नत्वे नानियाम्यत्वं। | 56 | भ्राम्यते जन्तुः। |
| 25 | अतथाविधा। | 57 | भ्रश्यते स्वर्गात्। |
| 26 | यत्कृतिः। | 58 | आरोग्यस्य। |
| 27 | इच्छाज्ञानक्रियास्वरूपत्वात्। | 59 | निर्विकारे क्रियाऽभावात्। |
| 28 | न सन्नासत्। | 60 | बन्धमोक्षयोश्च |
| 29 | सदसत्त्वात्। | 61 | सर्वत्र चिन्त्यम्। |
| 30 | तद् भ्रान्तिः। | 62 | शून्यत्वो वा निगलवत्। |
| 31 | यत् सत्। | 63 | पीतविषवद्धि रोधोपलब्धेः। |
| 32 | इदानीमुपाधिविचारः क्रियते। | 64 | तद्योगात्तद्योगः। |

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

65 तद्योगे तद्योगः इति।
66 तत्त्यागस्तद्व्याप्यत्वात्।
67 बन्धनैयत्यापत्तेः।
68 नास्तीति भ्रमः।
69 अस्तीत्यतिरिक्तमपि।
70 पक्षान्तरासिद्धेः।
71 तदभावाभावात्।
72 लिंगमलिंग्यम् तल्लिंगम्।
73 प्राबल्यात्।
74 वशीकृतेशित्वात्कामिनीत्वात् मोहकत्वाद्वा।
75 यन्मातापितरौ।
76 बीजोत्पत्तेरैन्द्रजालिकम्।
77 न तज्जातेः।
78 निर्गुणत्वात्।
79 तत्कामित्वाद् व्यासः।
80 तत्परो जैमिनिः।
81 तत्स्वामिन्नो हयाननश्च।
82 उक्तवानगस्त्यः।
83 तद्वेदी वैष्कलायनः।
84 कण्ठः कर्तृत्वम्।
85 पराशरः प्राबल्यम्।
86 वसिष्ठो मोहनम्।
87 शुकस्त्वात्मानम्।
88 मातरम् नारदः।
89 मन्वानस्तरन्ति संसारम्।
90 उक्तलिंगैः सद्भिः प्रमाणैः।
91 तत्तु तितिरिः।
92 छन्दोगाश्च।
93 मारीचस्तद्वादी।
94 यच्छिवः।
95 हरिरन्तर्गुरुर्बहिः।
96 कालो भेदे दुरुद्बोध्यः।
97 तल्लेशः।
98 दहरव्यापित्वात्।
99 तत्प्राक्तद्बहिः।
100 एवं ब्रह्मविदः।
101 अधर्माद् बन्धः।
102 धर्मो हि वृत्तौ।
103 न मोहे च हिंसा यस्य।
104 अतश्चित्तप्रमादः।
105 सौभरिणीमाठरायणोः।
106 न हि वेदो न हि वेदस्तद्विदः।
107 विन्दति वेदान् प्रकृतिम्।
108 तरति तां तस्मात्।
109 ब्रह्मभूयाय कल्पते ब्रह्मभूयाय कल्पत इति।
110 विदित्वैवं तरति।
111 यत्कृत्वा।
112 जैमिनिरनात्मेति।
113 गौणीति प्राचुर्यात्।

।। इति शक्ति सूत्राणि।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM